# १५ पञ्चदश दशकः - सुदर्शन कथा - देवी दर्शनम्

एवं तवैव कृपया मुनिवर्यशीत-
च्छायाश्रितो हतभयः स सुदर्शनोऽयम् ।
वेद ध्वनि श्रवण पूत हृदाश्रमान्ते
सम्मोदयन् मुनिजनान् ववृधे कुमारः ॥ १५-१॥

आबाल्य मेष मुनि बालक सङ्गमेन
क्लीं क्लीमि तीश्वरि सदा तव बीजमन्त्रम् ।
तत्रोच्चचार कृपयाऽस्य पुरः कदाचित्
आविर्बभूविथ नतं तमभाषथाश्च ॥ १५-२॥

प्रीताऽस्मि ते सुत जगज्जननी मवेहि
मां सर्वकाम वरदां तव भद्रमस्तु ।
चन्द्राननां शशिकलां विमलां सुबाहोः
काशीश्वरस्य तनयां विधिनोद्वह त्वम् ॥ १५-३॥

नष्टा भवेयु रचिरेण तवारिवर्गा
राज्यं च यै रपहृतं पुन रेष्यसि त्वम् ।
मातृ द्वयेन सचिवैश्च समं स्वधर्मान्
कुर्याः सदेति समुदीर्य तिरोदधाथ ॥ १५-४॥

स्वप्ने त्वया शशिकला कथिताऽस्ति भार-
द्वाजाश्रमे प्रथित कोसल वंशजातः ।
धीमान् सुदर्शन इति ध्रुवसन्धि पुत्र
एनं पतिं वृणु तवास्तु शुभं सदेति ॥ १५-५॥

स्वप्नानुभूत मनृतं किमृतं न वेति
सुप्तोत्थिता तु मतिमत्यपि न व्यजानात् ।
पृष्टात्सुदर्शन कथां सुमुखी द्विजात्सा
श्रुत्वाऽनुरक्त हृदयैव बभूव देवि ॥ १५-६॥

ज्ञात्वा सुबाहु रिदमाकुल मानसस्तां
अस्मा न्निवर्त्तयितु माशु सहेष्टपत्न्या ।
कृत्वा प्रयत्न मखिलं विफलं च पश्यन्
इच्छा स्वयंवर विधिं हितमेव मेने ॥ १५-७॥

कश्चित्कदाचन सुदर्शन मेत्य विप्रः
प्राहागतः शशिकला वचसाऽह मत्र ।
सा त्वां ब्रवीति- नृपपुत्र जगज्जनन्या
वाचा वृतोऽसि पतिरस्मि तवैव दासी ॥ १५-८॥

अत्रागता नृपतयो बहवस्त्वमेत्य
तेषां सुधीर मिषतां नय मां प्रियां ते ।
एवं वधू वचन मानय तां सुशीलां
भद्रं तवास्त्विद मुदीर्य जगाम विप्रः ॥ १५-९॥

स्वप्ने च जाग्रति च पश्यति भक्तवर्यः
त्वां सन्ततं तव वचो मधुरं शृणोति ।
ऐश्वर्य माशु लभतेऽपि च मुक्तिमेति
त्वद्भक्ति मेव मम देहि नमो जनन्यै ॥ १५-१०॥